हे पार्थ ! वेदों के अर्थवाद से सन्तुष्ट "इस के सिवाय पाने योग्य ईश्वर तत्त्व और कुछ नहीं है" ऐसा विश्वास रखने वाले, कामना से चित्त को भरे हुए और स्वर्ग की लालसा वाले जो मूर्ख लोग जन्म कर्म देने वाली, भोग और ऐश्वर्य्य पाने के साधन भूत बहुत क्रिया युक्त जिस पुष्पित वाणी को कहते हैं ॥ ४२ ॥ ४३ ॥

This flowery talk which they that are ignorant, they that delight in the words of the Vedas, they, O Pârtha, that say that there is nothing else, they whose minds are attached to worldly pleasures, they that regard heaven as the highest object of acquisition, utter—which promises birth as fruit of action and which concerns itself with multifarious rites of specific characters for the attainment of pleasures and power. 42—43

भोगैश्वर्यप्रसक्तानाम् । तया । अपहृतचेतसाम् । व्यवसायात्मिका । बुद्धिः । समाधौ । न विधीयते॥४४॥

तया अपहृतचेतसां भोगैश्वर्यप्रसक्तानां समाधौ व्यवसायात्मिका बुद्धिः न विधीयते ॥ ४४ ॥

उस (उक्त पुष्पित वाक्य) से मन खोने वाले तथा भोग और ऐश्वर्य में लगे हुओं की परमार्थ तत्त्वज्ञान की बुद्धि समाधि (अर्थात् योग) में स्थिर नहीं होती है ॥ ४४ ॥

Their hearts being deluded by that (flowery talk), the minds of those men who are attached to pleasure and power cannot be directed to contemplation regarding it as the sole means of emancipation. 44

त्रैगुण्यविषयाः । वेदाः । निस्त्रैगुण्यः । भव । अर्जुन । निर्द्वन्द्वः । नित्यसत्त्वस्थः । निर्योगक्षेमः । आत्मवान्॥४५ ॥

(हे) अर्जुन वेदाः त्रैगुण्यविषयाः निर्द्वन्द्वः नित्य-सत्वस्थः निर्योगक्षेमः आत्मवान् निस्त्रैगुण्यः भव॥४५

हे अर्जुन ! वेद कर्मफल के साधक हैं, इस लिये तुम कामनाओं से रहित होओ, सुख दुःख आदि भावों से रहित होओ, सदा सत्त्व में स्थित रहो, जो वस्तु प्राप्त हुई उस की रक्षा और जो प्राप्त नहीं हुई उस की प्राप्ति से आत्मवान् (अप्रमत्त) होओ ॥ ४५ ॥

The Vedas are concerned with three qualities. Be thou O Arjuna, free from them, uneffected by pairs of contraries ever adhering to patience, without anxiety for new acquisitions or protection of those already acquired, and self-possessed. 45

यावान् । अर्थः । उदपाने । सर्वतः । संप्लुतोदके । तावान् । सर्वेषु । वेदेषु । ब्राह्मणस्य । विजानतः ॥४६॥

सर्वतः संप्लुतोदके उदपाने यावान् अर्थः ब्राह्मणस्य विजानतः सर्वेषु वेदेषु तावान् ॥ ४६ ॥

जोउदपान (अर्थात् कूआ तालाब आदि छोटे जलाशयों) से प्रयोजन होता है बहुत विस्तृत जलाशय से भी उतना प्रयोजन सिद्ध होता है, काम्य कर्म्मों के फल की आशा रखने वालों का वेदों से जितना प्रयोजन है इसी प्रकार कर्मफलत्यागी ब्राह्मण का भी सब वेदों में उतना प्रयोजन है ॥ ४६ ॥

Whatever object is served by a tank or well, may be served by a vast sheet of water extending all around. So whatever object may be served by all the Vedas, may all be had qy a Brahman possessing knowledge. 46

कर्म्मणि । एव । अधिकारः । ते । मा । फलेषु । कदाचन । मा । कर्मफलहेतुः । भूः । मा । ते । संगः । अस्त । अकर्मणि ॥ ४७ ॥

ते कर्म्मणि एव अधिकारः फलेषु मा, कर्मफल-
हेतुः कदाचन मा भूः ते अकर्मणि संगः मा अस्तु॥४७॥

कर्म में ही तुम्हारा अधिकार है, तुम कर्मफल के हेतु(फलार्थी) मत हो, कर्म के न करने की तुम्हारी प्रवृत्ति न हो (अर्थात् कर्म के करने में ही तत्पर रहो) ॥ ४७ ॥

Thy business is with work only, but not with the fruit. So let not the fruit be thy motive for work, nor let thy inclination be for inaction. 47

योगस्थः । कुरु । कर्माणि । संगं । त्यक्त्वा । धनं-
जय । सिद्ध्यसिद्ध्योः । समः । भूत्वा । समत्वम् । योगः ।
उच्यते ॥ ४८ ॥

(हे) धनंजय सिद्ध्यसिद्ध्योः समः भूत्वा संगं त्य-
क्त्वा योगस्थः (सन्) कर्माणि कुरु समत्वं योगः उ-
च्यते ॥ ४८ ॥

हे धनंजय! कर्तृत्व की बुद्धि त्याग कर सिद्धि और असिद्धि में तुल्य भाव युक्त होकर और योग में स्थित होकर कर्म किया करो, समता ही को योग कहते हैं ॥ ४८ ॥

Dwelling in devotion, perform action, casting off attachment, O Dhananjaya, and being the same in success and failure. This equanimity is called yoga. 48

दूरेण । हि । अवरम् । कर्म । बुद्धियोगात् । धनं-
जय । बुद्धौ । शरणम् । अन्विच्छ । कृपणाः । फलहे-
तवः ॥ ४९ ॥

(हे) धनंजय बुद्धियोगात् कर्म हि दूरेण अवरं बुद्धौ

शरणं अन्विच्छ कृपणाः (पुरुषाः) फलहेतवः (भवन्ति) ॥ ४९ ॥

हे धनंजय ! व्यवसायात्मिका बुद्धि से ज्ञात कर्मयोग से दूसरे कर्म बहुत बुरे हैं, इस कारण से ज्ञान का आश्रय कर फलकामी मनुष्य कृपण होते हैं ॥ ४९ ॥

Action is far lower to devotion. O Dhananjaya seek refuge in devotion, miserable are they who work for the sake of fruit. 49

बुद्धियुक्तः । जहाति । इह । उभे । सुकृतदुष्कृते । तस्मात् । योगाय । युज्यस्व । योगः । कर्मसु । कौशलम् ॥ ५० ॥

बुद्धियुक्तः इह सुकृतदुष्कृते उभे जहाति तस्मात् युज्यस्व योगः कर्मसु कौशलम् ॥ ५० ॥

व्यवसायात्मिका बुद्धि युक्त मनुष्य इस लोक में सुकृत और दुष्कृत इन दोनों को त्याग देता है, सो तुम योग में स्थित हो जाओ, कर्म में कुशलता ही योग है ॥ ५० ॥

He who has devotion throws off both good and evil actions in this, therefore cleave thyself to yoga. (Devotion) yoga is only cleverness in deeds. 50

कर्मजम् । बुद्धियुक्ताः । हि । फलम् । त्यक्त्वा । मनीषिणः । जन्मबन्धविनिर्मुक्ताः । पदम् । गच्छन्ति । अनामयम् ॥ ५१ ॥

बुद्धियुक्ताः मनीषिणः कर्मजं फलं त्यक्त्वा जन्मबन्धविनिर्मुक्ताः हि अनामयं पदं गच्छन्ति ॥ ५१ ॥

बुद्धि युक्त पण्डितगण कर्म से उपजने वाले फल को निश्चय से

त्याग कर और जन्म के बन्धन से मुक्त होकर सब उपद्रवों से रहित मोक्ष पद को प्राप्त होते हैं ॥ ५१ ॥

The wise, united to devotion cast off the fruit which action yeilds, and freed from the obligation of birth go to that place where there is always happiness. 51

यदा । ते । मोहकलिलम् । बुद्धिः । व्यतितरिष्यति । तदा । गन्ता । असि । निर्वेदम् । श्रोतव्यस्य । श्रुतस्य । च ॥ ५२ ॥

यदा ते बुद्धिः मोहकलिलं व्यतितरिष्यति तदा श्रोतव्यस्य च श्रुतस्य निर्वेदं गन्ता असि ॥ ५२ ॥

जब तुम्हारी बुद्धि मोह रूप अविद्या से दूर हो जायगी तब तुम सुनने योग्य और सुने हुए के वैराग्य को प्राप्त होगे ॥ ५२ ॥

When thy mind shall pass beyond the filth of delusion then shalt thou attain to an indifference as regards the hearable and the heard. 52

श्रुतिविप्रतिपन्ना । ते । यदा । स्थास्यति । निश्चला । समाधौ । अचला । बुद्धिः । तदा । योगम् । अवाप्स्यसि ॥ ५३ ॥

यदा ते बुद्धिः श्रुतिविप्रतिपन्ना निश्चला समाधौ अचला स्थास्यति तदा योगं अवाप्स्यसि ॥ ५३ ॥

जब तुम्हारी बुद्धि श्रुति में विशेष आसक्त, निश्चल, और समाधि में अचल ठहरेगी, तब तुम योग को प्राप्त होगे ॥ ५३ ॥

When thy mind, distracted by what thou hast heard, will be firmly and immovably fixed on contemplation, then wilt thou attain to devotion. 53

अर्जुन । उवाच । अर्जुन ने कहा । *Arjuna said.*

स्थितप्रज्ञस्य । का । भाषा । समाधिस्थस्य । केशव । स्थितधीः । किम् । प्रभाषेत । किम् । आसीत । व्रजेत । किम् ॥ ५४ ॥

(हे) केशव स्थितप्रज्ञस्य समाधिस्थस्य का भाषा स्थितधीः किम् प्रभाषेत किम् आसीत किम् व्रजेत॥५४।

हे केशव ! योग में स्थित स्थितप्रज्ञ (अर्थात् स्थिर बुद्धि जन) का क्या लक्षण है? स्थितधी (अर्थात् स्थिरबुद्धि जन) क्या कहे, कैसा रहे, कैसा चले ॥ ५४ ॥

What O Keshava, are the marks of one whose mind is able on contemplation. How dose one of steady-knowledge stpeak how sit and how move. 54

श्रीभगवान्उवाच। श्रीभगवाननेकहा *The blessed Lord said.*

प्रजहाति । यदा । कामान् । सर्वान् । पार्थ । मनोगतान् । आत्मनि । एव । आत्मना । तुष्टः । स्थितप्रज्ञः । तदा । उच्यते ॥ ५५ ॥

(हे) पार्थ यदा आत्मना आत्मनि एव तुष्टः मनोगतान् सर्वान् कामान् प्रजहाति तदा स्थितप्रज्ञः उच्यते ॥ ५५ ॥

हे पार्थ ! परमानन्द रूप आत्मा में स्वयं प्रसन्न होकर जब (योगी) मन की सारी कामना त्याग देता है तब वह स्थितप्रज्ञ कहलाता है ॥ ५५ ॥

When one casts away all the desires of the heart and is pleased in the self with self, then is he said to be of stable mind. 55

दुःखेषु । अनुद्विग्नमनाः । सुखेषु । विगतस्पृहः ।
वीतरागभयक्रोधः । स्थितधीः । मुनिः । उच्यते ॥५६॥

दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः वीत-रागभयक्रोधः मुनिः स्थितधीः उच्यते ॥ ५६ ॥

दुःख में न घबराने वाले, सुख की लालसा न रखने वाले, अनुराग, भय और क्रोध से रहित मुनि को स्थितधी कहते हैं ॥ ५६ ॥

He whose mind is not agitated amid calamities, whose desire for pleasure is gone, who is freed from attachment, fear and anger, is said to be a Muni of stable mind. 56

यः । सर्वत्र । अनभिस्नेहः । तत् । तत् । प्राप्य ।
शुभाशुभम् । न । अभिनन्दति । न । द्वेष्टि । तदा ।
स्थितप्रज्ञः । तदा । उच्यते ॥ ५७ ॥

यः सर्वत्र अनभिस्नेहः तत् तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि तदा स्थितप्रज्ञः उच्यते ॥५७॥

जो सब विषयों में स्नेह से रहित है और उस उस शुभ तथा अशुभ को पाने से न आनन्द न खेद मानता है वही स्थिरबुद्धि कहलाता है ॥ ५७ ॥

He who is without affection on every side and who feeleth no exultation and no aversion on attaining diverse objects that are agreeable and disagreeable, is said to be of steady mind. 57

यदा । संहरते । च । अयम् । कूर्मः । अङ्गानि ।
इव । सर्वशः । इन्द्रियाणि । इन्द्रियार्थेभ्यः । तस्य । प्रज्ञा ।
प्रतिष्ठिता ॥ ५८ ॥

यदा च अयं कूर्मः सर्वशः अङ्गानि इव इन्द्रिया-र्थेभ्यः इन्द्रियाणि संहरते तस्य प्रज्ञा प्रतिष्ठिता॥५८॥

कूर्म के अङ्गों की तरह (अर्थात् कूर्म जैसे अपने अङ्गों को बाहर से शरीर के भीतर समेट लेता है वैसे ही) जब वह इन्द्रियों के विषयों से इन्द्रियों को खींच लेता है तब उस की प्रज्ञा स्थित होती है ॥५८॥

When one withdraws his senses from the objects of senses as the tortoise its limbs from all sides, even his is steadiness of mind. 58

विषयाः । विनिवर्तन्ते । निराहारस्य । देहिनः । रसवर्ज्जम् । रसः । अपि । अस्य । परम् । दृष्ट्वा । नि-वर्त्तते ॥ ५९ ॥

निराहारस्य देहिनः रसवर्ज्जं विषयाः विनिव-र्तन्ते अस्य रसः परं अपि दृष्ट्वा निवर्त्तते ॥ ५९ ॥

इन्द्रियों के द्वारा विषय ग्रहण न करने वाले पुरुष के विषया-नुभव निवृत्त होते हैं परन्तु विषयानुराग निवृत्त नहीं होता । किन्तु परमात्मा को देख कर इस की अभिलाषा निवृत्त हो जाती है ॥ ५९ ॥

Objects of senses fall back from an abstinent person, but not the passion. Even the passion turneth away from one who hath beheld the Supreme. 59.

यततः । हि । अपि । कौन्तेय । पुरुषस्य । विप-श्चितः । इन्द्रियाणि । प्रमाथीनि । हरन्ति । प्रसभम् । मनः ॥ ६० ॥

(हे) कौन्तेय विपश्चितः पुरुषस्य यततः अपि हि प्रमाथीनि इन्द्रियाणि प्रसभं मनः हरन्ति ॥ ६० ॥

हे कुन्तीनन्दन ! क्योंकि प्रमाथी (अर्थात् मन हि डोलने वाले) इन्द्रियगण मोक्ष का यत्न करने वाले विद्वान पुरुष के मन को भी बल से हर लेता है ॥ ६० ॥

O son of Kunti, the agitating senses impetuously draw away the mind of even a wise man striving hard to keep himself aloof from them. 60

तानि । सर्वाणि । संयम्य । युक्तः । आसीत । मत्परः । वशे । हि । यस्य । इन्द्रियाणि । तस्य । प्रज्ञा।प्रतिष्ठिता ॥ ६१ ॥

युक्तः तानि सर्वाणि इन्द्रियाणि संयम्य मत्परः आसीत यस्य इन्द्रियाणि वशे तस्य हि प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

जोगी (जन) उन सब इन्द्रियों को रोक कर मत्परायण रहे, क्योंकि जिस के वश में इन्द्रिय हो जाते हैं उस की प्रज्ञा स्थिर होती है ॥ ६१ ॥

Restraining them all, one should stay in contemplation making me his sole refuge ! for his is steadiness of mind whose senses are mastered. 61

ध्यायतः । विषयान् । पुंसः । सङ्गः । तेषु । उपजायते । सङ्गात् । संजायते कामः । कामात् । क्रोधः । अभिजायते ॥ ६२ ॥

विषयान् ध्यायतः पुंसः तेषु सङ्गः उपजायते सङ्गात् कामः संजायते कामात् क्रोधः अभिजायते ॥ ६२ ॥

• विषयों का ध्यान करने वाले पुरुष की आसक्ति उन में उत्पन्न होती है, आसक्ति से काम और काम से क्रोध उत्पन्न होता है ॥ ६२ ।

Thinking of the objects of sense, a person's attachment is begotten towards them, from attachment ariseth desire, from desire springeth anger. 62

क्रोधात् । भवति । संमोहः । संमोहात् । स्मृति-विभ्रमः । स्मृतिभ्रंशात् । बुद्धिनाशः । बुद्धिनाशात् । प्रणश्यति ॥ ६३ ॥

क्रोधात् संमोहः भवति संमोहात् स्मृतिविभ्रमः । (भवति) स्मृतिभ्रंशात् । बुद्धिनाशः (भवति)बुद्धिनाशात् प्रणश्यति ॥ ६३ ॥

क्रोध से संमोह होता है (अर्थात् हित अहित का विचार दूर होता है) संमोह से स्मृति भ्रम, (सदुपदेशों की भूल) स्मृति भ्रम से बुद्धि नाश और बुद्धिनाश से सर्व नाश होता है (अर्थात् पुरुष एक बार ही पतित होता है ॥ ६३ ॥

From wrath ariseth delusion, from delusion loss of memory, from loss of memory the destruction of understanding, from destruction of understanding, he perishes. 63

रागद्वेषवियुक्तैः । तु । विषयान् । इन्द्रियैः । चरन् आत्मवश्यैः । विधेयात्मा । प्रसादम् । अधि-गच्छति ॥ ६४ ॥

विधेयात्मा रागद्वेषवियुक्तैः तु आत्मवश्यैः इन्द्रियैः विषयान् चरन् प्रसादं अधिगच्छति ॥ ६४ ॥

अनुराग और द्वेषसे रहित अपने वश में आए इन्द्रियों से विषयों का भोग कर के चित्त को वश में लाया हुआ जन शान्ति को प्राप्त होता है ॥ ६४ ॥

But the self-restrained person, enjoying sense-objects with senses freed from attraction and aversion and under his own control, goeth to peace of mind. 64

प्रसादे । सर्वदुःखानाम् । हानिः । अस्य । उप-जायते । प्रसन्नचेतसः । हि । आशु । बुद्धिः । पर्यव-तिष्ठते ॥ ६५ ॥

प्रसादे अस्य सर्वदुःखानां हानिः उपजायते हि प्रसन्नचेतसः बुद्धिः आशु पर्यवतिष्ठते ॥ ६५ ॥

चित्त की प्रसन्नता के होने पर इस के सब दुःखों का नाश हो जाता है, प्रसन्न चित्त पुरुष की बुद्धि शीघ्र ही प्रतिष्ठित होती है ॥ ६५ ॥

On peace being obtained the extinction of all his miseries taketh (seat) place, for of him whose heart is peaceful the mind becometh stable. 65

न । अस्ति । बुद्धिः । अयुक्तस्य । न । च । अयुक्तस्य भावना । च । अभावयतः । शान्तिः । अशान्तस्य । कुतः सुखम् ॥ ६६ ॥

अयुक्तस्य बुद्धिः न अस्ति च अयुक्तस्य भावना न च अभावयतः शान्तिः न अशान्तस्य सुखं कुतः (अस्ति) ॥ ६६ ॥

इन्द्रियों को वश में न लाए जन को बुद्धि नहीं है, अवश इन्द्रिय वाले का ध्यान भी नहीं हो सकता (अर्थात् आत्मज्ञान में मन जम नहीं सकता) आत्मध्यान रहित पुरुष की शान्ति नहीं होती, और शान्ति रहित पुरुष को किस प्रकार सुख हो सकता है ॥ ६६ ॥

He who is not self-restrained hath no Budhi He who is not self-restrained hath no Concentration. He who hath no concentration hath no peace And for the unpeaceful how can there be happiness. 66

इन्द्रियाणाम् । हि । चरताम् । यत् । मनः । अनुविधीयते । तत् । अस्य । हरति । प्रज्ञाम् । वायुः । नावम् । इव । अम्भसि ॥ ६७ ॥

हि यत् मनः चरतां इन्द्रियाणां अनुविधीयते तत् अस्य प्रज्ञां वायुः अम्भसि नावं इव हरति ॥ ६७ ॥

क्योंकि जैसे वायु नाव को जल में डुबो देती है वैसे मन विषय में विचरने वाले अवशीभूत इन्द्रियों में से जिस के अनुकूल चलता है वही इस की प्रज्ञा को हर लेता है ॥ ६७ ॥

For the heart that follows in the wake of the roving senses destroyeth his understanding, just as the wind destroys a boat in the water. 67

तस्मात् । यस्य । महाबाहो । निगृहीतानि । सर्वशः । इन्द्रियाणि । इन्द्रियार्थेभ्यः । तस्य । प्रज्ञा । प्रतिष्ठिता ॥ ६८ ॥

तस्मात् (हे) ! महाबाहो यस्य इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वशः निगृहीतानि तस्य प्रज्ञा प्रतिष्ठिता (वर्तते) ॥

हे महाभुज ! जिस के इन्द्रियगण इन्द्रियों के विषयों से सब प्रकार से निगृहीत हुए हैं उसकी प्रज्ञा प्रतिष्ठित हुई है (अर्थात् उसे ही ब्रह्मज्ञान प्राप्त होता है) ॥ ६८ ॥

Therefore, O mighty armed, his is the steadiness of mind whose senses are all completely restrained (on all sides) from their objects of sense. 68

या । निशा । सर्वभूतानाम् । तस्याम् । जागर्ति । संयमी । यस्याम् । जाग्रति । भूतानि । सा । निशा । पश्यतः । मुने ॥ ६९ ॥

सर्वभूतानां या निशा तस्यां संयमी जागर्ति यस्याम् भूतानि जाग्रति पश्यतःमुने सा निशा (विद्यते)॥ ६९ ।

सब भूतों को जो रात्रि होती है उस में संयमी (अर्थात् इन्द्रियों के रोकने वाला) जन जागता रहता है और जिस में सब भूत जागते रहते हैं वह आत्मतत्वदर्शी मुनि के लिए रात्रि होती है ॥ ६९ ॥

When it is night for all creatures for the restrained man is the time of waking, and when other beings are awake that is night for a muni. 69.

अपूर्यमाणम् । अचलप्रतिष्ठम् । समुद्रम् । आपः । प्रविशन्ति । यद्वत् । तद्वत् । कामाः । यम् । प्रविशन्ति सर्वे ।सः । शांति । आप्नोति । न । काम । कामी ॥७०

यद्वत् अपूर्यमाणम् अचलप्रतिष्ठं समुद्रं आपः प्रविशन्ति तद्वत् सर्वे कामाः यं प्रविशन्ति सः शान्तिं आप्नोति काम कामी न (आप्नोति) ॥७०॥

जिस प्रकार समुद्र में जो परिपूर्ण हो कर भी चञ्चल नहीं होता जल प्रवेश करता है वैसे ही जिस में सब कामना प्रवेश करती हैं वही शान्ति को प्राप्त होता है परन्तु भोग की कामना करने वाला जन मोक्ष को नहीं प्राप्त होता ॥ ७० ॥

He attains to peace into whom all desires enter as waters

enter the ocean which (though) filled (yet) remains unaltered; but not he who desires objects. 70.

विहाय । कामान् । यः सर्वान् । पुमान् । चरति । निःस्पृहः । निर्ममः । निरहंकारः । सः । शान्तिम् । अधिगच्छति ॥ ७१ ॥

यः पुमान् सर्वान् कामान् विहाय निःस्पृहः चरति सः निर्ममः निरहंकारःशान्तिंअधिगच्छति ॥ ७१

जो पुरुष सर्व कामनाओं को त्याग कर स्पृहा रहित अहंकार वर्जित तथा भोग साधना के अनुराग से रहित हो कर घूमता है वह जन शान्ति को पाता है ॥ ७१ ॥

That man who moveth about leaving all desires, who is free from yearning and has no affection and no pride, goes to peace. 71

एषा । ब्राह्मी । स्थितिः । पार्थ न । एताम् । प्राप्य । विमुह्यति । स्थित्वा । अस्याम् । अंतकाले । अपि । ब्रह्मनिर्वाणम् । ऋच्छति ॥ ७२ ॥

(हे) पार्थ एषा ब्राह्मी स्थितिः (वर्तते) एनां प्राप्य न विमुह्यति अस्यां अन्तकाले अपि स्थित्वा ब्रह्म-निर्वाणं ऋच्छति ॥ ७२ ॥

हे पार्थ ! ब्रह्मज्ञान की निष्टा ऐसी है इस को पा कर पुरुष मुर्झाता नहीं है (अर्थात् संसार के मोह से कातर नहीं होता) मृत्यु काल में भी इस में स्थित हो कर लय हो जाता है ॥७२

This O son of Prithá—is the Brahman-state, obtaining it, none is deluded, establishing in it on the death time one attains absorption into the Supreme Self. 72

इति द्वितीयोऽध्यायः ।

अथ तृतीयोऽध्यायः ।

अर्जुनः । उवाच । अर्जुन बोला । Arjuna said

ज्यायसी । चेत् । कर्मणः । ते । मता । बुद्धिः । जनार्दन । तत् । किम् । कर्मणि । घोरे । माम् । नियोजयसि । केशव ॥ १ ॥

(हे) जनार्दन चेत् कर्मणः बुद्धिः ते ज्यायसी मता तत् (हे) केशव घोरे कर्मणि मां किं नियोजयसि ॥१॥

हे जनार्दन ! हे केशव ! यदि तुम्हारा मत ऐसा ही है, कि कर्म से बुद्धियोग श्रेष्ठ है, तो क्यों मुझे घोर कर्म में नियुक्त करते हो ॥१॥

O Janárdana, if devotion is regarded by thee as superior to work why then, O Keshava, dost thou engage me in such dreadful action. 1

व्यामिश्रेण । एव । वाक्येन । बुद्धिम् । मोहयसि । इव । मे । तत् । एकम् । वद । निश्चित्य । येन । श्रेयः । अहम् । आप्नुयाम् ॥ २ ॥

व्यामिश्रेण एव वाक्येन मे बुद्धिं मोहयसि इव येन अहं श्रेयः आप्नुयां तत् एकं निश्चित्य वद ॥ २ ॥

मिश्र वाक्य से (अर्थात् कभी कर्म की प्रशंसा और कभी ज्ञान की प्रशंसा सुनाकर) मेरी बुद्धि को मानो मोहित कर रहे हो, ऐसी एक (बात) निश्चिय से कहो जिस से मेरा हित हो ॥ २

By equivocal words thou seemest to confound my undesstanding, therefore, tell (me) one thing definitely by which I may attain to what is good. 2

श्री भगवान् उवाच श्री भगवान् बोले

The Blessed Lord said :—

लोके । अस्मिन् । द्विविधा । निष्ठा । पुरा । प्रोक्ता । मया । अनघ । ज्ञानयोगेन । सांख्यानाम् । कर्मयोगेन । योगिनाम् ॥ ३ ॥

(हे) अनघ अस्मिन् लोके पुरा मया द्विविधा निष्ठा प्रोक्ता सांख्यानां ज्ञानयोगेन योगिनां कर्मयोगेन ॥ ३ ॥

हे पाप से रहित ! इस लोक में दो प्रकार की निष्ठा (रहने की बात) मैं पहिले कह चुका हूं (उन में एक ज्ञान निष्ठा वा ज्ञान योग और दूसरा कर्म निष्ठा वा कर्म योग है) ज्ञान योग से सांख्यों की (अर्थात् विवेक ज्ञान रखने वाले कामना त्यागी परमहंसकी) और कर्म योग से योगियों की (अर्थात् कर्म के अधिकारी चित्त शुद्धि की कामना रखने वालों की) निष्ठा (है) ॥ ३ ॥

It has already been said by me, O sinless one, that there are, in this world, two kinds of devotion; that of the Sánkhyas through Knowledge and that of the yogins through Work. 3

न । कर्मणाम् । अनारम्भात् । नैष्कर्म्यम् । पुरुषः । अश्नुते । न । च । सन्यसनात् । एव । सिद्धिम् । समधिगच्छति ॥ ४ ॥

पुरुषः कर्म्मणां अनारम्भात् नैष्कर्म्यं न अश्नुते च सन्यसनात् एव सिद्धिं न समधिगच्छति ॥ ४ ॥

(क्योंकि) पुरुष कर्मों के अनुष्ठान किये बिना ज्ञान लाभ नहीं

कर सकता है, (चित्त शुद्धिके बिना) केवल सन्यास से ही सिद्धि प्राप्त नहीं होती है ॥ ४ ॥

A man does not attain freedom from work from the non-performance of work. Nor does he attain final emancipation from renunciation only. 4

न । हि । कश्चित् । क्षणम् । अपि । जातु । तिष्ठति । अकर्मकृत् । कार्यते । हि । अवशः । कर्म । सर्वैः । प्रकृतिजैः । गुणैः ॥ ५ ॥

जातु क्षणं अपि अकर्मकृत् कश्चित् हि न तिष्ठति । हि सर्वैः प्रकृतिजैः गुणैः अवशः कर्म कार्यते॥ ५ ॥

किसी दशा में क्षणमात्र भी पुरुष कर्म किये बिना नहीं रह सकता है राग द्वेष आदि स्वाभाविक गुण सब को ही अवश करके कर्म कराते हैं ॥ ५ ॥

No one can abide even for a moment without working, for all persons, constrained by the tendencies of disposition, perform work. 5

कर्मेन्द्रियाणि । संयम्य । यः । आस्ते । मनसा । स्मरन् । इन्द्रियार्थान् । विमूढात्मा । मिथ्याचारः । सः । उच्यते ॥ ६ ॥

यः कर्मेन्द्रियाणि संयम्य मनसा इन्द्रियार्थान् स्मरन् आस्ते सः विमूढात्मा मिथ्याचारः उच्यते ॥६॥

जो कर्म करने की इन्द्रियों को संयत करके मन ही मन (अर्थात् मनसे) इन्द्रियों के विषयों का स्मरण करता है, वह मूढात्मा कपटी कहा जाता है ॥ ६ ॥

That man of deluded soul who, curbing the organs of sense, lives mentally cherishing the objects of sense, is said to be a dissembler. 6

यः । तु । इन्द्रियाणि । मनसा । नियम्य । आरभते अर्जुन । कर्मेन्द्रियैः । कर्मयोगम् । असक्तः । सः । विशिष्यते ॥ ७ ॥

(हे) अर्जुन यः तु मनसा कर्मेन्द्रियाणि नियम्य असक्तः (विषयेषु) कर्मेन्द्रियैः कर्मयोगं आरभते सः विशिष्यते ॥ ७ ॥

जो मन से इन्द्रियों को संयत करके कर्म की इन्द्रियों से कर्म योग का अनुष्ठान करता है हे अर्जुन ! वही (विषयो में) असक्त श्रेष्ठ कहा जाता है ॥ ७ ॥

He, however O Arjun, who restraining senses by his mind, engages in devotion of work with the organs of work, and is free from attachment, is distinguished. 7

नियतम् । कुरु । कर्म । त्वम् । कर्म । ज्यायः । हि अकर्मणः । शरीरयात्रा । अपि । च । ते । न । प्रसिध्येत् अकर्मणः ॥ ८ ॥

त्वं नियतं कर्म कुरु हि अकर्मणः कर्म ज्यायः च अकर्मणः ते शरीरयात्रा अपि न प्रसिध्येत् ॥ ८ ॥

(इसलिए) तुम अवश्य (कर्तव्य) कर्म करो, क्योंकि कर्म के न करने से कर्म का करना ही अच्छा है म अकर्मों से रहित होने से तुम्हारी शरीरयात्रा भी न होगी ॥ ८ ॥

(Therefore) do thou always perform right action for action is better than inaction. Even the support of thy body can not be accomplished without works. 8

यज्ञार्थात् । कर्मणः । अन्यत्र । लोकः । अयम् ।

कर्मबन्धनः। तदर्थम्। कर्म। कौन्तेय। मुक्तसङ्गः। समाचर॥ ९॥

यज्ञार्थात् कर्मणः अन्यत्र अयंलोकः कर्मबन्धनः हे कौन्तेय मुक्तसङ्गः तदर्थं कर्म समाचर॥ ९॥

यज्ञार्थ कर्म के बिना दूसरा कर्म करने से यह लोक कर्म बद्ध होता है अतः हे कुन्तीनन्दन ! निष्काम होकर कर्म का अनुष्ठान करो॥ ९॥

This world is fettered by all work other than that which is for sacrifice. O son of Kuntí, perform work for the sake of that, freed from attachment. 9

सहयज्ञाः। प्रजाः। सृष्ट्वा। पुरा। उवाच। प्रजापतिः। अनेन। प्रसविष्यध्वम्। एषः। वः। अस्तु। इष्टकामधुक्॥ १०॥

प्रजापतिः पुरा सहयज्ञाः प्रजाः सृष्ट्वा उवाच अनेन प्रसविष्यध्वं एषः वः इष्टकामधुक् अस्तु। १०

पूर्व काल में प्रजापति ने यज्ञ (अर्थात् नित्य और नैमित्तिक क्रियाओं) के साथ साथ प्रजा को रचकर कहा था (हे मनुष्यों) इस से तुम बढ़ते रहो, यह (क्रिया) तुम्हारी इष्ट सिद्ध की देने वाली हो॥ १०॥

The Lord of creation, in old times, creating men and sacrifice together, said, multiply by means of this. Let this be to you the dispenser of all objects cherished by you. 10

देवान्। भावयत। अनेन। ते। देवाः। भावयन्तु। वः। परस्परम्। भावयन्तः। श्रेयः। परम्। अवाप्स्यथ॥ ११॥

अनेन देवान् भावयत ते देवाः वः भावयन्तु परस्परं भावयन्तः परं श्रेयः अवाप्स्यथ ॥ ११ ॥

इस से (तुम) देवों का संवर्द्धन करो वे देव गण भी तुम्हे वर्धित करेंगे, इस प्रकार एक दूसरे का संवर्द्धन करते हुए परम कल्याण को प्राप्त होंगे ॥ ११ ॥

Rear the gods with this, and let the gods rear you Rearing each other, you will attain that which is beneficial. 11

इष्टान् । भोगान् । हि । वः । देवाः । दास्यन्ते । यज्ञभाविताः । तैः । दत्तान् । अप्रदाय । एभ्यः । यः । भुङ्क्ते । स्तेनः । एव । सः ॥ १२ ॥

हि यज्ञभाविताः देवाः वः इष्टान् भोगान् दास्यन्ते यः तैः दत्तान् (भोगान्) एभ्यः अप्रदाय भुङ्क्ते सः स्तेनः एव ॥ १२ ॥

क्योंकि देवता लोग यज्ञ से सन्तुष्ट होकर तुम को वांछित फल देंगे, उन की दी हुई वस्तु बिना उन को अर्पण किये जो भोगता है, वह चोर है ॥ १२ ॥

Reared by sacrifices the gods will bestow on you thes pleasures you desire. He who enjoys (himself) without giving them what they have given, is assuredly a thief. 12.

यज्ञशिष्टाशिनः । सन्तः । मुच्यन्ते । सर्वकिल्विषैः भुञ्जते । ते । त । अघम् । पापाः । ये । पचन्ति । आत्मकारणात् ॥ १३ ॥

यज्ञशिष्टाशिनः सन्तः सर्वकिल्बिषैः मुच्यन्ते ये
आत्मकारणात् पचन्ति ते पापाः तु अघं भुञ्जते।१३।

यज्ञ को बची हुई वस्तु खाने वाले साधु लोग सब पापों से छूटते हैं, (परन्तु) जो अपने ही वास्ते भोजन बनाते हैं, वे पापी पाप को ही खाते हैं ॥ १३ ॥

The good who eat the remnants of sacrifices are freed from all sins Those unrighteous ones incur sin who dress food for their own sake. 13

अन्नात् । भवन्ति । भूतानि । पर्जन्यात् । अन्न-
सम्भवः । यज्ञात् । भवति । पर्जन्यः । यज्ञः । कर्म-
समुद्भवः ॥ १४ ॥

भूतानि अन्नात् भवन्ति अन्नसम्भवः पर्जन्यात्
(भवति) पर्जन्यः यज्ञात् भवति यज्ञः कर्मसमुद्भवः ॥१४

सम्पूर्ण भूत प्राणी) अन्न से उत्पन्न होते हैं, वर्षा से अन्न उत्पन्न होता है, वर्षा यज्ञ से होती है और यज्ञ कर्म से उत्पन्न होता है ॥ १४ ॥

From food all creatures come forth; from rain is the production of food ; rain is produced from sacrifice ; and sacrifice is the outcome of work. 14

कर्म । ब्रह्मोद्भवम् । विद्धि । ब्रह्म । अक्षरसमुद्भवम् ।
तस्मात् । सर्वगतम् । ब्रह्म । नित्यम् । यज्ञे । प्रति-
ष्ठितम् ॥ १५ ॥

कर्म ब्रह्मोद्भवम् विद्धि ब्रह्म अक्षरसमुद्भवं (विद्धि)
तस्मात् सर्वगतं ब्रह्म यज्ञे नित्यं प्रतिष्ठितम् ॥ १५ ॥

कर्म को वेद से उत्पन्न हुआ जानो वेद परमब्रह्म से उत्पन्न

हुए हैं इस लिए सर्वव्यापक परमात्मा ही सदा यज्ञ में प्रतिष्ठित है ॥ १५ ॥

Understand that work proceeds from the Vedas; the Vedas have proceeded from Him who has no decay. Therefore, the All-pervading Supreme Being is installed in sacrifice. 15

एवम् । प्रवर्त्तितम् । चक्रं । न । अनुवर्त्तयति । इह । यः । अघायुः । इन्द्रियारामः । मोघम् । पार्थ । सः । जीवति ॥ १६ ॥

(हे) पार्थ यः इह एवं प्रवर्त्तितं चक्रं न अनुवर्त्तयति सः इन्द्रियारामः अघायुः मोघं जीवति ॥ १६ ॥

इस प्रकार से चलते हुए (कर्म के) चक्र को जो अनुवर्त्त न नहीं करता है, हे पार्थ ! वह इन्द्रियों के विषय में फंसा हुआ पाप जीवन इस जगत् में वृथा जीता है ॥ १६ ॥

He who does not conform to the wheel that is thus revolving, that man of sinful life delighting in his senses, lives in vain, O Pártha. 16

यः । तु । आत्मरतिः । एव । स्यात् । आत्मतृप्तः च । मानवः । आत्मनि । एव । च । संतुष्टः । तस्य कार्यम् । न । विद्यते ॥ १७ ॥

यः तु मानवः आत्मरतिः एव च आत्मतृप्तः स्यात् च आत्मनि एव सन्तुष्टः तस्य कार्यं न विद्यते ॥ १७ ॥

जो मनुष्य आत्मा में ही प्रसन्न रहता है आत्मा में ही रमण करता है और आत्मा में ही सन्तुष्ट रहता है उस को कुछ कर्तव्य नहीं है ॥ १७ ॥

The man, however, that is attached to self only, that is contented with self, and that is pleased in his self, has no action. 17

न। एव। तस्य। कृतार्थेन। अर्थः। न। अकृतेन। इह। कश्चन। न। च। अस्य। सर्वभूतेषु। कश्चित्। अर्थव्यपाश्रयः॥ १८॥

इह तस्य कृतेन न एव कश्चन अर्थः अकृतेन (अपि) न कश्चन अर्थः च अस्य सर्वभूतेषु कश्चित् अर्थव्यपाश्रयः न॥ १८॥

इस लोक में कृत कर्म से उस को पुण्य नहीं होता है न करने के हेतु पाप भी नहीं होता है और सब भूतों में कोई भी मोक्ष के लिये उस का आश्रय नहीं है (अर्थात् उसे किसी की शरण नहीं लेनी पड़ती है)॥ १८॥

He has no concern whatever with action nor with any omission here. Nor, amongst all creatures, is there any upon whom his interest depends. 18

तस्मात्। असक्तः। सततम्। कार्यम्। कर्म। समाचर। असक्तः। हि। आचरन्। कर्म। परम्। आप्नोति। पूरुषः॥ १९॥

तस्मात् असक्तः कार्यं कर्म सततं समाचर हि असक्तः कर्म आचरन् पूरुषः परं आप्नोति॥ १९॥

इस लिए तुम फल के अनुराग से रहित हो कर सदा अवश्य कर्त्तव्य कर्म का अनुष्ठान करो, क्योंकि अनुराग से रहित हो कर कर्म को करता हुआ मनुष्य मोक्ष को प्राप्त होता है॥ १९॥

Therefore, always do work that should be done, without attachments. The man who does action without attachment attains to the Supreme. 19

कर्मणा । एव । हि । संसिद्धिम् । आस्थिताः । जनकादयः । लोकसंग्रहम् । एव । अपि । संपश्यन् । कर्तुम् । अर्हसि ॥ २० ॥

हि जनकादयः कर्मणा एव संसिद्धिं आस्थिताः लोकसंग्रहं एव अपि संपश्यन् (त्वम्) कर्तुं अर्हसि २०

जनकादि (महात्माओं) ने कर्म से पूर्ण ज्ञान प्राप्त किया है लोगों को स्वधर्म में सन्नद्ध करने की ओर दृष्टि रख कर (तुम्हें) कर्म करना चाहिये ॥ २० ॥

By work alone, Janaka and others, attained the accomplishment of their objects. Having regard also to the observance by men of their duties, it behoves thee to work. 20

यत् । यत् । आचरति । श्रेष्ठः । तत् । तत् । एव । इतरः । जनः । सः । यत् । प्रमाणम् । कुरुते । लोकः । तत् । अनुवर्तते ॥ २१ ॥

श्रेष्ठः यत् यत् आचरति इतरः जनः तत् तत् एव (आचरति) सः यत् प्रमाणं कुरुते लोकः तत् अनुवर्त्तते ॥ २१ ॥

क्योंकि श्रेष्ठजन जो २ करता है अन्य भी वह २ कर्म करता है। वह जो प्रमाण करता है, लोक भी उसी का अनुसरण करता है ॥२१॥

Whatever one that is great does, even that vulgar people do. Whatever he makes an authority, ordinary men follow that. 21

न । मे । पार्थ । अस्ति । कर्तव्यम् । त्रिषु । लोकेषु किंचन । न । अनवाप्तम् । अवाप्तव्यम् । वर्ते । एव । कर्मणि ॥ २२ ॥

(हे)पार्थ त्रिषु लोकेषु मे किंचन कर्तव्यं न अस्ति च अनवाप्तं अवाप्तव्यं न कर्मणि एव वर्ते ॥ २२ ॥

हे पार्थ ! तीनलोकों में मुझे कुछ भी कर्तव्य नहीं है मुझे कोई भी अप्राप्त वस्तु प्राप्त करने के योग्य - नहीं है (तो भी) मैं कर्म में प्रवृत्त हूं ॥ २२ ॥

There is nothing whatever for me, O Pártha, to do in the three worlds, nothing to acquire which has not been acquired ; still I engage in action. 22

यदि । हि । अहम् । न । वर्तेयम् । जातु । कर्मणि । अतन्द्रितः । मम । वर्त्म । अनुवर्तन्ते । मनुष्याः । पार्थ । सर्वशः ॥ २३ ॥

(हे) पार्थ ! यदि जातु अतन्द्रितः अहं कर्मणि न वर्तेयं हि सर्वशः मनुष्याः मम वर्त्म अनुवर्तन्ते ॥२३॥

हे पार्थ ! यदि कभी भी आलस से रहित हो कर कर्म का अनुष्टान न करूं तो सब मनुष्य मेरे ही मार्ग का (सब प्रकार से) अनुसरण करेंगे ॥ २३ ॥

For if at any time I should not, without sloth, engage in action, men would follow my path, O Pártha, on all sides. 23.

उत्सीदेयुः । इमे । लोकाः । न । कुर्याम् । कर्म । चेत् । अहम् । संकरस्य । च । कर्ता । स्याम् । उपहन्याम् । इमाः । प्रजाः ॥ २४॥

चेत् अहं कर्म न कुर्यां इमे लोकाः उत्सीदेयुः संकरस्य कर्ता च स्यां इमाः प्रजाः उपहन्याम् ॥ २४ ॥

यदि मैं कर्म न करूं, तो ये सब लोक नष्ट हो जांए और मैं वर्ण संकर का कर्त्ता बनूं (इस प्रकार से) मैं ही इन प्रजाओं को नाश करूंगा ॥ २४ ॥

Then worlds would perish if I did not perform work, and I should cause intermixture of castes and ruin these people. 24

सक्ताः। कर्मणि। अविद्वांसः। यथा। कुर्वन्ति। भारत। कुर्यात्। विद्वान्। तथा। असक्तः। चिकीर्षुः। लोकसंग्रहम्॥ २५॥

(हे) भारत यथा अविद्वांसः कर्मणि सक्ताः कुर्वन्ति तथा असक्तः विद्वान् लोकसंग्रहं चिकीर्षुः कुर्यात्॥ २५ ॥

हे भारत जिस प्रकार से अज्ञ लोक कर्म मे आसक्त हो कर कर्म का अनुष्ठान करते हैं, उसी प्रकार विज्ञ लोक कर्म में आसक्त न हो कर भी लोगों को स्वधर्म में सन्नद्ध रखने की इच्छा युक्त होकर कर्म करें॥ २५ ॥

As they, that are ignorant, work, O Bhárata, being attached to work, so should a wise man work without being attached, desiring to make men observant of their duties. 25

न। बुद्धिभेदम्। जनयेत्। अज्ञानाम्। कर्मसंगिनाम्। जोषयेत्। सर्वकर्माणि। विद्वान्। युक्तः। समाचरन्॥ २६॥

विद्वान् युक्तः समाचरन् कर्मसंगिनां अज्ञानां

सर्वकर्माणि जोषयेत् बुद्धिभेदं न जनयेत् ॥ २६ ॥

विवेकी कर्मासक्त के बुद्धि भेद को मत उत्पन्न करे पण्डित जन ध्यान के साथ सब कर्मों को करता हुआ अज्ञों को कर्म में नियुक्त करे ॥ २६ ॥

A wise man should not cause confusion of understanding among ignorant persons who are attached to work; he should, acting with devotion, engage them to all (kinds of) work. 26

प्रकृतेः । क्रियमाणानि । गुणैः । कर्माणि । सर्वशः । अहंकारविमूढात्मा । कर्ता । अहम् । इति । मन्यते । २७

सर्वशः कर्माणि प्रकृतेः गुणैः क्रियमाणानि अहंकारविमूढात्मा अहं कर्ता इति मन्यते ॥ २७ ॥

सब कर्म प्रकृति के गुणों से (अर्थात् बुद्धि इन्द्रिय आदि से) निर्वाहित होते हैं (परन्तु) अहंकार से मूढात्मा बना हुआ जन मैं करने वाला हूं ऐसा मानता है ॥ २७ ॥

All work is, in every way, done by the qualities of nature. He, however, whose mind is deluded by egoism, regards himself as the actor. 27

तत्ववित् । तु । महाबाहो । गुणकर्मबिभागयोः । गुणाः । गुणेषु । वर्तन्तते । इति । मत्वा । न । सज्जते ॥ २७ ॥

(हे) महाबाहो तु गुणकर्मविभागयोः तत्त्ववित् गुणाः गुणेषु वर्तन्ते इति मत्वा न सज्जते ॥ २८ ॥

परन्तु हे महाभुज ! गुण से आत्मा का और कर्म से आत्मा का विभाग इन दोनों के तत्वों को जानने वाला इन्द्रिय गण ही विषयों

में प्रवृत्त हो रहे हैं (मैं नहीं) ऐसा समझ कर आसक्त नहीं होता है ॥ २८ ॥

But he, O mighty armed one, who knows the truth about the divisions of the energies and (their) functions is not attached to work, considering that it is his senses alone that engage in their objects. 28

प्रकृतेः । गुणसंमूढाः । सज्जन्ते । गुणकर्मसु । तान् । अकृत्स्नविदः । मन्दान् । कृत्स्नवित् । न । विचालयेत् ॥ २९ ॥

प्रकृतेः गुणसंमूढाः गुणकर्मसु सज्जन्ते तान् अकृत्स्नविदः मन्दान् कृत्स्नवित् न विचालयेत् । २९

प्रकृति के गुणों से मोहित हो कर जो लोग गुण कर्म में आसक्त होते हैं। सर्वज्ञजन उन अज्ञ तथा मन्द बुद्धि वालों को (उस कार्य से) न हटावे ॥ २९ ॥

They that are deluded by the qualities of nature, become attached to the works done by the qualities. A person of perfect knowledge should not bewilder those men of imperfect knowledge. 29

मयि । सर्वाणि । कर्माणि । संन्यस्य । अध्यात्मचेतसा । निराशीः । निर्ममः । भूत्वा । युध्यस्व । विगतज्वरः ॥ ३० ॥

अध्यात्मचेतसा मयि सर्वाणि कर्माणि संन्यस्य निराशीः निर्ममः भूत्वा विगतज्वरः युध्यस्व ॥ ३० ॥

अध्यात्मचित्त से सब कर्म को मुझ में समर्पण कर के निष्काम और (कर्म से) अनुराग रहित हो के शोक त्याग पूर्वक युद्ध करो ॥ ३० ॥

Resigning all works to me with mind directed to the Self, engage in battle, without desire, without affection, and with thy fever dispelled. 30

ये । मे । मतम् । इदम् । नित्यम् । अनुतिष्ठन्ति । मानवाः । श्रद्धावन्तः । अनसूयन्तः । मुच्यन्ते । ते । अपि । कर्मभिः ॥ ३१ ॥

ये मानवाः इदं मे मतं नित्यं अनुतिष्ठन्ति श्रद्धावन्तः अनसूयन्तः ते अपि कर्मभिः मुच्यन्ते ।३१।

जो मनुष्य (मेरे वाक्यों में) श्रद्धा युक्त और दोष की दृष्टि से रहित होकर मेरे इस मत का अनुष्ठान करते हैं वे भी सब कर्मों से मुक्त होते हैं ॥ ३१ ॥

Those men that always follow this opinion of mine with faith and without cavil, attain to final emancipation even by work. 31

ये । तु । एतत् । अभ्यसूयन्तः । न । अनुतिष्ठन्ति । मे । मतम् । सर्वज्ञानविमूढान् । तान् । विद्धि । नष्टान् । अचेतसः ॥ ३२ ॥

ये तु एतत् मे मतं अभ्यसूयन्तः न अनुतिष्ठन्ति सर्वज्ञानविमूढान् तान् अचेतसः नष्टान् विद्धि ॥ ३२ ॥

परन्तु जो लोग दोष मात्र देखने वाले हो कर मेरे इस मत का अनुष्ठान नहीं करते हैं उन अविवेकियों को मूढ बुद्धि और नष्ट जानो ॥ ३२ ॥

But they who cavil at and do not follow this opinion of mine, know, those, bereft of all knowledge and without discrimination, as ruined. 32

सदृशम् । चेष्टते । स्वस्याः । प्रकृतेः । ज्ञानवान् । अपि । प्रकृतिम् । यान्ति । भूतानि । निग्रहः । किम् । करिष्यति ॥ ३३ ॥

ज्ञानवान् अपि स्वस्याः प्रकृतेः सदृशं चेष्टते भूतानि प्रकृतिं यान्ति निग्रहः किं करिष्यति ॥ ३३ ॥

ज्ञान भी अपनी प्रकृति के अनुकूल कर्म करता है प्राणी स्वभाव का अनुसरण करते हैं तो निग्रह क्या करेगा ॥ ३३ ॥

Even a wise man acts according to his own nature, all living creatures follow nature. What then would restraint avail. 33

इन्द्रियस्य । इन्द्रियस्य । अर्थे । रागद्वेषौ । व्यवस्थितौ । तयोः । न । वशम् । आगच्छेत् । तौ । हि । अस्य । परिपन्थिनौ ॥ ३४ ॥

इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ तयोः वशं न आगच्छेत् हि तौ अस्य परिपन्थिनौ (स्तः) ॥ ३४ ॥

प्रत्येक इन्द्रिय के विषय में अनुराग और विद्वेष स्थित हैं (अर्थात् अनुकूल में अनुराग और प्रतिकूल में विद्वेष) उन दोनों के वश में न आए क्योंकि वे दोनों इस के शत्रु हैं ॥ ३४ ॥

The senses have, as regards the objects of the senses, either affection or aversion fixed. One should not submit to these, for they are obstacles in one's way. 34

श्रेयान् । स्वधर्मः । विगुणः । परधर्मात् । स्वनुष्ठितात् । स्वधर्मे । निधनम् । श्रेयः । परधर्मः । भयावहः ॥ ॥३५॥

रजोगुणसमुद्भवः एषः कामः महाशनः महापाप्मा एषः क्रोधः इह एनं वैरिणं विद्धि ॥ ३७ ॥

रजोगुण से उत्पन्न होने वाली (वाला) यह कामना और क्रोध है जो कि बड़ा पापी और अति विषय सेवन रूप अहार करने वाला है, इस लोक में इसे शत्रु जानो ॥ ३७ ॥

It is desire, it is wrath, born of the attribute of passion; it is all devouring, it is very sinful. Know this to be the foe in this world. 37

धूमेन । आव्रियते । वह्निः । यथा । आदर्शः । मलेन च । यथा । उल्बेन । आवृतः । गर्भः । तथा । तेन । इदम् । आवृतम् ॥ ३८ ॥

यथा वह्निः धूमेन आव्रियते च आदर्शः मलेन आव्रियते यथा गर्भः उल्वेन आवृतः तथा इदं तेन आवृतम् ॥ ३८ ॥

जैसे अग्नि धूएं से, दर्पण मैल से, गर्भ जरायु से आच्छादित होता है, वैसे ही यह (आत्मज्ञान) उस (कामना) से घिरा हुआ है ॥ ३८ ॥

As fire is enveloped by smoke, a mirror by dust, the fœtus by the womb, so is this enveloped by desire. 38

आवृतम् । ज्ञानम् । एतेन । ज्ञानिनः । नित्यवैरिणा । कामरूपेण । कौन्तेय । दुःपूरेण । अनलेन । च । ॥ ३९ ॥

(हे) कौन्तेय ज्ञानिनः नित्यवैरिणा दुःपूरेण अनलेन च कामरूपेण एतेन ज्ञानं आवृतम् ॥ ३९ ॥

ज्ञानीके सदा के शत्रु इस कामनारूपी एकायक न बुझने वाली अग्नि से ज्ञान आच्छादित रहता है ॥ ३९ ॥

O son of Kunti, knowledge is enveloped by this constant foe of the wise in the form of desire which is insatiable and like a fire. 39

इन्द्रियाणि । मनः । बुद्धिः । अस्य । अधिष्ठा-नम् । उच्यते । एतैः । विमोहयति । एषः । ज्ञानम् । आवृत्य । देहिनम् ॥ ४० ॥

अस्य इन्द्रियाणी मनः बुद्धिः अधिष्टानं उच्यते एषः एतैः ज्ञानं आवृत्य देहिनं विमोहयति ॥ ४० ॥

इन्द्रिय मन और बुद्धि इस के (अर्थात् कामना के) अधिष्ठान (अर्थात् आधार) कहे जाते हैं, यह कामना इन से ज्ञान को आच्छा-दित कर के देहधारी को मोहित करती है ॥ ४० ॥

The senses, the mind, and the understanding, are said to be its abode. With these it deludes the embodied self, enveloping knowledge. 40

तस्मात् । त्वम् । इन्द्रियाणि । आदौ । नियम्य । भरतर्षभ । पाप्मानम् । प्रजहि । हि । एनम् । ज्ञानवि-ज्ञाननाशनम् ॥ ४१ ॥

(हे) भरतर्षभ तस्मात् त्वं इन्द्रियाणि आदौ नियम्य ज्ञानविज्ञाननाशनं एनं पाप्मानं हि प्रजहि। ४१ ॥

इस लिये हे भरतकुलतिलक ! तुम पहिले इन्द्रियों को संयत कर के ज्ञान और विज्ञान के नाश करने वाली पाप रूपी इस कामना को नष्ट करो ॥ ४१ ॥

Therefore, restraining sense first, O bull of Bharata race, cast off this wicked thing, for it destroys knowledge derived from both instruction and meditation. 41

इन्द्रियाणि। पराणि। आहुः। इन्द्रियेभ्यः। परम्। मनः। मनसः। तु। परा। बुद्धिः। यः। बुद्धेः। परतः। तु। सः॥ ४२॥

इन्द्रियाणि पराणि आहुः इन्द्रियेभ्यः परं मनः तु मनसः परा बुद्धिः तु यः बुद्धेः परतः तुः सः ४२॥

इन्द्रिय श्रेष्ठ कहे जाते हैं, इन्द्रियों से मन श्रेष्ठ है, मन से बुद्धि श्रेष्ठ है, और बुद्धि से जो श्रेष्ठ है, वह वही (आत्मा) है॥ ४२॥

It has been said that the senses are superior. Superior to the senses is the mind. Superior to the mind is the understanding. But that which is superior to the understanding. is He. 42

एवम्। बुद्धेः। परम्। बुद्ध्वा। संस्तभ्य। आत्मानम्। आत्मना। जहि। शत्रुम्। महाबाहो। कामरूपम्। दुरासदम्॥ ४३॥

हे महाबाहो एवं बुद्धेः परं बुद्ध्वा आत्मना आत्मानं संस्तभ्य कामरूपं दुरासदं शत्रुं जहि॥ ४३॥

हे महाभुज! इस प्रकार बुद्धि से श्रेष्ठ (आत्मतत्त्व) को जान कर आत्मा से आत्मा को अटल बना कर कामना रूपी न रुकने वाले शत्रु को जीत लो॥ ४३।

Thus knowing that which is superior to the understanding, and restraining self by self, slay, O mighty armed one, the enemy in the form of desire which is difficult to conquer. 43



अथ चतुर्थोऽध्यायः।

श्री भगवान उवाच।

The Lord said :—

इमम्। विवस्वते। योगम्। प्रोक्तवान्। अहम्। अव्ययम्। विवस्वान्। मनवे। प्राह। मनुः। इक्ष्वाकवे। अब्रवीत्॥ १॥

अहं इमं अव्ययं योगं विवस्वते प्रोक्तवान् विवस्वान् मनवे प्राह मनुः इक्ष्वाकवे अब्रवीत्॥ १॥

मैंने सूर्य से इस अक्षय योग को कहा था सूर्य ने अपने पुत्र मनु से कहा था, मनु ने (अपने पुत्र) इक्ष्वाकु से कहा था॥ १॥

This imperishable Devotion I communicated to Vivaswat, Vivaswat declared it to (his son) Manu and Manu declared it to Ikshaku. 1

एवम्। परम्पराप्राप्तम्। इमम्। राजर्षयः। विदुः। सः। कालेन। इह। महता। योगः। नष्टः। परंतप॥ २॥

(हे) परंतप एवं परम्पराप्राप्तं इमं योगं राजर्षयः विदुः सः योगः इह महता कालेन नष्टः॥ २॥

हे परन्तप इस प्रकार परम्परा से प्राप्त इस योग को राजर्षियों ने जाना था इस लोक से कालवश के कारण वह योग नष्ट हुआ है॥ २॥

Descending thus from generation to generation, the royal sages came to understand it. But O, chastiser of foes, by long time that devotion became lost to the world. 2

सः । एव । अयम् । मया । ते । अद्य । योगः । प्रोक्तः । पुरातनः । भक्तः । असि । मे । सखा । च । इति । रहस्यम् । हि । एतत् । उत्तमम् ॥ ३ ॥

सः एव अयं पुरातनः योगः मया ते अद्य प्रोक्तः हि मे भक्तः असि च इति सखा एतत् उत्तमं रहस्यम् ॥ ३ ॥

इस लिये उस प्राचीन योग को मैंने आज तुम से कहा, क्योंकि तुम मेरे मित्र और भक्त हो यह उत्तम रहस्य (गोपनीय) है ॥ ३ ॥

Even the same devotion has been declared by me to you to day because you are my devotee and friend: this is a great Secret. 3

अर्जुनः उवाच । अर्जुनबोला ।

Arjuna said :—

अपरम् । भवतः । जन्म । परम् । जन्म । विवस्वतः । कथम् । एतत् । विजानीयाम् । त्वम् । आदौ प्रोक्तवान् । इति ॥ ४ ॥

भवतः जन्म अपरं विवस्वतः जन्म परं त्वं आदौ प्रोक्तवान् इति एतत् कथं विजानीयाम् ॥ ४ ॥

आप का जन्म पीछे हुआ है और सूर्य का जन्म पहिले हुआ है इस लिये यह (मैं) कैसे जानूं कि आपने पहिले सूर्य से (यह योग) कहा था ॥ ४ ॥

Your birth is posterior, Vivaswat's birth is prior. (Therefore)How shall I know that you had first declared. 4

श्रीभगवान् उवाच । श्रीभगवान् बोले ॥

The Lord said :—

बहूनि । मे । व्यतीतानि । जन्मानि । तव । च । अर्जुन । तानि । अहम् । वेद्मि । सर्वाणि । न । त्वम् । वेत्थ । परन्तप ॥ ५ ॥

(हे) अर्जुन मे तव च बहूनि जन्मानि व्यतीतानि तानि सर्वाणि अहं वेद्मि (हे)परंतप त्वं न वेत्थ ॥५॥

हे अर्जुन ! मेरे और तुम्हारे बहुत जन्म हो चुके हैं मैं वे सब जानता हूं परन्तु हे परंतप ! तुम वे नहीं जानते हो ॥ ५ ॥

O Arjuna, many births of mine and yours have passed away. These all I understand, but you do not know, O chastiser of foes. 5

अजः । अपि । सन् । अव्ययात्मा । भूतानाम् । ईश्वरः । अपि । सन् । प्रकृतिम् । स्वाम् । अधिष्ठाय । संभवामि । आत्ममायया ॥ ६ ॥

अव्ययात्मा भूतानां अपि ईश्वरः सन् अजः अपि सन् स्वां प्रकृतिं अधिष्ठाय आत्ममायया संभवामि ॥ ६ ॥

जन्म रहित अविनाशी तथा प्राणियों का ईश्वर हो कर भी मैं अपनी प्रकृति में स्थित हो कर आत्म-माया के वश प्रकाशित होता हूं ॥ ६ ॥

Though (Iam) unborn and of essence that knoweth no deterioration, though (Iam) the lord of all creatures, still, relying on my own nature I take birth by my own (powers) of illusion. 6

यदा । यदा । हि । धर्मस्य । ग्लानिः । भवति । भारत । अभ्युत्थानम् । अधर्मस्य । तदा । आत्मानम् । सृजामि । अहम् ॥ ७ ॥

हे भारत ! यदा यदा हि धर्म्मस्य ग्लानिः अधर्मस्य अभ्युत्थानं भवति तदा अहं आत्मानं सृजामि ॥ ७ ॥

हे भारत ! जब जब धर्म की हानि और अधर्म की अधिकाई होती है तभी मैं जन्म लेता हूं ॥

Whensoever, O Bharata, loss of piety occureth, and the rise of impiety, on those occasions do I create myself.

परित्राणाय । साधूनाम् । विनाशाय । च । दुष्कृताम् । धर्मसंस्थापनार्थाय । संभवामि । युगे । युगे ॥ ८ ॥

साधूनां परित्राणाय च दुष्कृतां विनाशाय धर्मसंस्थापनार्थाय युगे युगे संभवामि ॥ ८ ॥

साधुओं के उद्धार तथा दुरात्माओं के विनाश (और) धर्म की स्थापना के लिये मैं युग युग में जन्म लेता हूं ॥

For the protection of the righteous, for also the destruction of evil doers for the sake of establishing piety I am born age after age. 8

जन्म । कर्म । च । मे । दिव्यम् । एवम् । यः । वेत्ति तत्त्वतः । त्यक्त्वा । देहम् । पुनः । जन्म । न । एति । माम् । एति । सः । अर्जुन ॥ ९ ॥

हे अर्जुन! यः मे जन्म च कर्म दिव्यं तत्त्वतः वेत्ति सः देहं त्यक्त्वा पुनः जन्म न एति (किन्तु) मां एति ॥९॥

हे अर्जुन ! जो मेरे ऐसे जन्म और अलौकिक कर्म को यथार्थ रूप से जानता है, वह देह को त्याग कर फिर जन्म नहीं लेता है (बल्कि) मुझे ही पाता है ॥ ९ ॥

O Arjuna, that man who truly knows my divine birth and work to be such, giving up (his body) is not born again, (on the other hand) he comes to me. 9

वीतरागभयक्रोधाः । मन्मयाः । माम् । उपाश्रिताः । बहवः । ज्ञानतपसा । पूताः । मद्भावम् । आगताः ॥ १० ॥

वीतरागभयक्रोधाः मन्मयाः मां उपाश्रिताः बहवः ज्ञानतपसा पूताः मद्भावं आगताः ॥ १० ॥

अनुराग, भय, (तथा) क्रोध रहित और मुझ पर दत्तचित्त हो कर, मुझे आश्रय करके ज्ञान रूपी तपस्या से पवित्र हो कर बहुतेरे मेरे भाव (अर्थात् मोक्ष) पाचुके हैं ॥ १० ॥

Many who have been freed from attachment, fear, and wrath, who were full of me and who relied on me, have cleansed by knowledge and asceticism, attained to my essence. 10

ये । यथा । माम् । प्रपद्यन्ते । तान् । तथा । एव । भजामि । अहम् । मम । वर्त्म । अनुवर्तन्ते । मनुष्याः । पार्थ । सर्वशः ॥ ११ ॥

(हे) पार्थ सर्वशः मनुष्याः मम वर्त्म अनुवर्तन्ते ये मां यथा प्रपद्यन्ते अहं तान् तथा एव भजामि ॥ ११

हे पार्थ सब मनुष्य मेरे ही मार्ग का अनुसरण करते हैं जो जिसे-

प्रकार से मेरी भक्ति करते हैं मैं उन को उसी प्रकार के फल से संयुक्त करता हूं ॥ ११ ॥

Howsoever manner men come to me, even so do I accept them. It is my path O son of Prithá, that men follow on all sides. 11

कांक्षन्तः । कर्मणाम् । सिद्धिम् । यजन्ते । इह । देवताः । क्षिप्रम् । हि । मानुषे । लोके । सिद्धिः । भवति । कर्मजा ॥ १२ ॥

कर्मणां सिद्धिं कांक्षन्तः इह देवताः यजन्ते हि मानुषे लोके क्षिप्रं कर्मजा सिद्धिः भवति ॥ १२ ॥

इस मनुष्य लोक में कामना युक्त कर्म की सिद्धि चाहने वाले देवतों की पूजा करते हैं क्योंकि शीघ्र ही कर्म के अनुसार सिद्धि प्राप्त होती है ॥ १२ ॥

They in this world that are desirous of the success of action worship the gods, for in this world of men the success resulting from action is soon attained. 12

चातुर्वर्ण्यम् । मया । सृष्टम् । गुणकर्मविभागशः । तस्य । कर्तारम् । अपि । माम् । विद्धि । अकर्तारम् । अव्ययम् ॥ १३ ॥

